# शिक्षा निदेशालय

## दिल्ली सर्वकारः

## पाठ्यक्रमस्य साप्ताहिक–कार्यपत्राकम्
## २०१२–१३

**विषयः – संस्कृतम्**

**कक्षा – सप्तमी**


दिशा–निर्देशन

**डा. सुनीता एस. कौशिक**

अतिरिक्त शिक्षा निदेशक (स्कूल/परीक्षा)

निर्देशिका / समन्वयकर्त्री

**स्नेहलता**

(पी.जी.टी. संस्कृत)

सर्वोदय कन्या विद्यालय, दयानन्द मार्ग, दरियागंजम्, दिल्ली

निर्माणकर्त्र्यौ

**रमा शर्मा**

टी.जी.टी.–संस्कृत

रा.उ.मा.कन्या विद्यालय नं. १,

रूपनगरम्, दिल्ली

**शालिनी रस्तोगी**

टी.जी.टी.–संस्कृत

रा.उ.मा. कन्या विद्यालय नं.२

शक्तिनगरम्, दिल्ली–७

नाम ............................ संस्कृतम्
रोल न. ........................ S.A.-I

# कक्षा – सप्तमी

# कार्यपत्राकम्–१

# प्रथमः पाठः (सुभाषितानि)

१. एकपदेन उत्तरत –

क) पृथिव्यां .............. रत्नानि। (त्रीणि/त्रायः)

ख) मूढैः ............... रत्नसंज्ञा विधीयते। (काञ्चनेषु/पाषाणखण्डेषु)

ग) पृथिवी ............. धार्यते। (सद्भिः/सत्येन)

ध) ............ सुंतिम् कुर्वीत। (सद्भिः/असद्भिः)

ड) लोके वशीकृतिः ................। (क्रोधः/क्षमा)

२. यथायोग्यं श्लोकांशान् मेलयत –

| | |
|---|---|
| धनधान्य प्रयोगेषु | नासद्भिः किञ्चिदाचरेत् |
| विस्मयो न हि कर्त्तव्यः | व्यक्तलज्जः सुखी भवेत् |
| सत्येन धार्यते पृथ्वी | बहुरत्ना वसुन्धरा |
| सद्भिर्विवादं मैत्री च | विद्यायाः संग्रहेषु च |
| आहारे व्यवहारे च | सत्येन तपते रविः |

३. रेखाङ्कित पदानि अधिकृत्य शुद्धं उत्तरं चिनुत :–

क) मूढैः <u>पाषाणखण्डेषु</u> रत्नसंज्ञा विधीयते। (केषु/कस्मिन्) ...............

ख) <u>सत्येन</u> धार्यते पृथ्वी। (कैः/केन) ...............

ग) <u>सद्भिः</u> सङ्गतिम् कुर्वीत। (कैः/काभिः) ...............

ध) <u>वसुन्धरा</u> बहुरत्ना भवति। (का/काः) ...............

ड) त्यक्तलज्जः <u>सुखी</u> भवेत्। (कम्/किम्) ...............

४ मञ्जूषात: पदानि चित्वा रिक्तस्थानानि पूरयत –

वसुन्धरा, जलम्, रवि:, वायु, अन्नम्, शान्ति: दुर्जन:, क्षमा, रत्नम्

| स: | सा | तत् |
|---|---|---|
| .................... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |

५. विपरीतार्थकं पदं मेलनं कुरुत –

| | | |
|---|---|---|
| क) | मित्राम् | आगन्तुम् |
| ख) | एकदा | प्रसन्न: |
| ग) | गन्तुम् | स्मृत्वा |
| ध) | क्रुद्ध: | बहुधा |
| ड) | विस्मृत्य | शत्रुम् |

६. कोष्ठकात् शुद्धं अर्थ चित्वा लिखत –

| | | | |
|---|---|---|---|
| क) | विस्मय: | .................................... | (आश्चर्य:/निश्चय:) |
| ख) | वसुन्धरा | .................................... | (पृथ्वी/जलम्) |
| ग) | वायु: | .................................... | (अनल:/पवन:) |
| ध) | सद्भि: | .................................... | (सज्जनै:/असज्जनै:) |
| ड) | मूढै: | .................................... | (मूर्खै:/शिक्षितै:) |

नाम ............................ | संस्कृतम्
रोल न. ........................ | S.A.-I

# कक्षा – सप्तमी

## कार्यपत्राकम्–२

## द्वितीयः पाठः (दुर्बुद्धिः विनश्यति)

१. एकपदेन उत्तरत –

क) सरः किम् नाम आसीत्?

ख) सरस्तीरे के आगच्छन्?

ग) कः आकाशमार्गेण अन्यत्रा गन्तुम् इच्छति?

ध) कूर्मं दृष्ट्वा के अधावन्?

ड) कः विनश्यति?

२. समानार्थकं पदं मेलनं कुरुत –

| | |
|---|---|
| सरः – | आकर्ण्य |
| कच्छपः | मत्स्यः |
| अपरः | तडागः |
| मीनः | अन्यः |
| श्रुत्वा | कूर्मः |

३. वाक्येषु क्रियापदं रेखांकितं कुरुत –

क) हंसाभ्याम् सह कूर्मोऽपि उड्डीयते। ............................

ख) अहं किञ्चिदपि न वदिष्यामि ............................

ग) अहं आकाशमार्गेण अन्यत्रा गन्तुम् इच्छामि। ............................

ध) वयं गृहं नीत्वा कूर्मं भक्षयिष्यामः। ............................

ड) एकः कूर्मः अपि तत्रैव प्रतिवसति स्म। ............................

४ अधोलिखितैः पदैः विभक्तितालिकां पूरयत –

सुखेन, हदं, कूर्माय, आकाशात्, धीवराः

| | |
|---|---|
| प्रथमा | .............................. |
| द्वितीया | .............................. |
| तृतीया | .............................. |
| चतुर्थी | .............................. |
| पंचमी | .............................. |

नाम ..........................
रोल न. ......................

संस्कृतम्
S.A.-I

# कक्षा – सप्तमी

## कार्यपत्राकम्–३

## द्वितीयः पाठः (दुर्बुद्धिः विनश्यति)

१. मञ्जूषातः पदानि चित्वा अनुच्छेदं पूरयत –

मञ्जूषा – वानरः, नदी, प्रतिदिनम्, जम्बूवृक्षः, नद्याम्, मकरः, जम्बूफलानि, अभवत्, शनैः, वानरस्य

एकस्मिन् (१) ...................... तटे एकः (२) ...................... आसीत्। तस्मिन् वृक्षे एकः (३) ...................... प्रतिवसति स्म। वानरः (४) ...................... जम्बूफलानि खादति स्म। कश्चित् (६) ............................. तस्यां (६) ...................... अवसत्। वानरः प्रतिदिनम् मकराय (७) ...................... अयच्छत्। शनैः (८) ................. मकरः (९) ...................... मित्राम्। (१०) ...................... ।

२. प्रदत्त–शब्दैः चित्रा वर्णनं त्रिाषु वाक्येषु कुरुत –




(एषः छात्राा, विद्यालयस्य, अस्ति, पठन्ति, भवनम्, अत्रा, सुन्दरम्, विद्यालयः)

१. ..................................................................................................

२. ..................................................................................................

३. ..................................................................................................

नाम ............................ संस्कृतम्
रोल न. ........................ S.A.-I

# कक्षा – सप्तमी

## कार्यपत्राकम्–४

## तृतीयः पाठः (स्वावलम्बनम्)

१. कोष्ठकात् शुद्धं उत्तरं चित्वा एकपदेन उत्तरत –

क) कस्य भवने सर्वविधानि सुखसाधनानि आसन्? (कृष्णमूर्तेः/श्रीकण्ठस्य)

ख) श्रीकण्ठस्य आतिथ्यम् के अकुर्वन्? (कृष्णमूर्तेः माता पिता/कर्मकराः)

ग) कति ऋतृवः भवन्ति? (षड्/सप्त)

ध) एकस्मिन् वर्षे कति मासा भवन्ति? (एकादश/द्वादश)

ड) कृष्णमूर्तेः कति कर्मकराः सन्ति? (अष्ट/पञ्च)

२. उचित संख्याशब्दैः रिक्तस्थानानि पूरयत –

क) गृहे (१) .................. बालकः अस्ति। (एकम्/एकः)

ख) मनुष्यस्य (२) ................ नेत्रो भवतः। (द्वौ/द्वे)

ग) मम हस्ते (३) ............ पुष्पाणि सन्ति। (त्रीणि/त्रायः)

ध) राजा दशरथस्य (४) ............ पुत्राः आसन्। (चत्वारि/चत्वारः)

ड) क्रीडाक्षेत्रो (३) ............ बालिकाः क्रीडन्ति। (तिस्रः/त्रायः)

च) पात्रो (२४) ................ फलानि सन्ति। (चत्वारिंशत्/चतुर्विंशतिः)

छ) कक्षायाम् (५०) ........... छात्राः सन्ति। (पञ्चाशत्/पञ्चत्रिंशत्)

ज) क्षेत्रो (२०) ............... कृषका कार्यं कुर्वन्ति। (विंशतिः/द्वाविशंनिः)

ञ) फरवरी मासे (२८) ................ दिनानि भवन्ति। (त्रिशंत्/अष्टाविंशतिः)

३. निम्नलिखितेषु वाक्येषु रिक्तस्थानानि उचितपदैः पूरयत –

१. ................ अश्वः धावति। (एषः/एतत्)

२. .............. बालकान् कथयत। (तान्/तम्)

३. ते.................. ग्रामेषु वसन्ति। (तस्मिन्/तेषु)

४ ...................... वाक्यानि पठत। (एतानि/एतत्)

५.  .................. बालिका: लिखन्ति। (ता:/तौ)

६.  ..................... बालकस्य पिता आगच्छति। (तस्या:/तस्य)

७.  .................... वृक्षे कोकिल: गायति। (तस्मिन्/तेषु)

८.  ....................... वाटिकायां पुष्पाणि अपि सन्ति। (तेषु/तस्याम्)

९.  ............... जनानां गृहम् अत्र अस्ति। (तासाम्/तेषाम्)

१०. ................ बालका: गृहम् गच्छन्ति। (ता:/ते)

५. 'किम्' शब्दस्य उचितरूपै: रिक्तस्थानानि पूरयत –

१.  .................. माला:? (क:/का:)

२.  .................. पुष्पम्? (किम्/कान्)

३.  .................. पुष्पाणि? (के/कानि)

४  .................. मूषक:? (क:/का)

५.  .................. मूषिका? (कौ/का)

६.  .................. लेखनी? (का/का:)

७  .................. गजा:? (का:/के)

८.  .................. अजे? (का/के)

९.  .................. अश्वौ? (कौ/किम्)

१०. .................. चक्रे? (का:/के)

नाम ............................ संस्कृतम्
रोल न. ........................ S.A.-I

# कक्षा – सप्तमी

## कार्यपत्राकम्–५

## चतुर्थः पाठः (हास्य बालकवि सम्मेलनम्)

१. रेखांकित पदानां कृते कोष्ठकात् उचितशब्दान् चित्वा प्रश्ननिर्माणं क्रियताम्

क) श्रोतारः कोलाहलं कुर्वन्ति। (के/काः)

ख) गजाधरः आधुनिकं वैद्यम् उद्दिश्य काव्यं श्रावयति। (कम्/किम्)

ग) लोके पुनः पुनः शरीराणि भवन्ति। (के/कानि)

ध) दशमः ग्रहः जामाता। (कः/के)

ड) तुन्दिलः तुन्दस्य उपरि हस्तम् आवर्त्तयति। (केषाम्/कस्य)

२. अशुद्धं पदं चिनुत –

क) गमन्ति, यच्छन्ति, पृच्छन्ति, धावन्ति।

ख) रामेण, गृहेण, सर्पेण, गजेण।

ग) लतया, सुप्रिया, रमया, निशया।

ध) लते, रमे, माते, प्रिये।

३. विलोमपदानि योजयत –

| | |
|---|---|
| अधः | नीचैः |
| अन्तः | सुलभम् |
| दुर्बुद्धेः | उपरिः |
| उच्चैः | बहिः |
| दुर्लभम् | सुबुद्धेः |

४ मञ्जूषातः समानार्थक–पदानि चित्वा लिखत –

प्रसन्नतायाः, चिकित्सकम्, लब्ध्वा, कुटिलः दक्षाः

| | |
|---|---|
| प्राप्य | .................... |
| कुशलाः | .................... |
| हर्षस्य | .................... |
| वक्रः | .................... |
| वैद्यम् | .................... |

५. मञ्जूषात: अव्ययपदानि चित्वा वाक्यानि पूरयत –

अलम्, अन्त:, बहि:, अपि, उपरि, एव, समीपे पुन: पुन:, सर्वत्रा, न

क) वृक्षस्य ................. कपय: तिष्ठन्ति।

ख) ग्रामात् ................ नदी अस्ति।

ग) स: पाठम् ................. पठित्वा स्मरति।

ध) वृक्षम् आरोढुम् वानरा: ................. सक्षमा:।

ड) अपूर्ण: धट: ............ शब्दं करोति।

च) समय: नष्ट: ............. करणीय:।

छ) .............. विवादेन।

ज) छात्रा: विद्यालयस्य ........................ प्रविशन्ति।

झ) उद्यानस्य ................ क्रीडाक्षेत्राम् अस्ति।

ञ) ईश्वर: ................. अस्ति।

नाम ............................ संस्कृतम्
रोल न. ........................ S.A.-I

# कक्षा – सप्तमी

# कार्यपत्राकम्–६

# पञ्चमः पाठः (पण्डिता रमाबाई)

१. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

रमाबाई संस्कृतवैदुष्येण 'पण्डिता' 'सरस्वती' इति उपाधिभ्यां विभूषिता। सा १८५८ तमे ख्रिष्टाब्दे जन्म अलभत। तस्याः पिता अनन्तशास्त्री डोंगरे माता च लक्ष्मीबाई आस्ताम्। तस्मिन् काले स्त्रीशिक्षायाः स्थितिः चिन्तनीया आसीत्। स्त्रीणां कृते संस्कृत शिक्षणं प्रायः प्रचलितं नासीत्। किन्तु पण्डितः अनन्तशास्त्री डोंगरे रूढिबद्धां धारणां परित्यज्य स्वपत्नीं संस्कृतमध्यापयत्। एतदर्थं रमायाः पिता समाजस्य प्रतारणाम् अपि असहत। अनन्तरं रमा अपि स्वमातुः संस्कृतशिक्षां प्राप्तवती।

१. एकपदेन उत्तरत –

क) 'पण्डिता' 'सरस्वती' इति उपाधिभ्यां का विभूषिता?

ख) रमा कुतः संस्कृतशिक्षां प्राप्तवती?

२. पूर्णवाक्येन उत्तरत

क) रमायाः पितुः मातुः च किम् नाम आसीत्?

ख) रमा कदा जन्म अलभत?

३. निर्देशानुसारम् उत्तरत –

क) 'पण्डितः अनन्तशास्त्री' अनयोः पदयोः विशेषणपदं किम्?

क) अध्यापकः ख) पण्डितः ग) कवि ध) विद्वान्

नाम ............................ संस्कृतम्
रोल न. ........................ S.A.-I

# कक्षा – सप्तमी

## अभ्यासकार्यम्–७

## पञ्चमः पाठः (पण्डिता रमाबाई)

१. अधोलिखित्कथनानाम् समक्षम् 'आम्' अथवा 'न' पाठानुसारेण लिखत –

क) रमायाः पतेः नाम विपिनबिहारी दास 'इति' आसीत्। [ ]

ख) रमायाः पिता समाजस्य प्रतारणाम् न असहत। [ ]

ग) रमा पुणे नगरे 'शारदा सदनम्' अस्थापयत्। [ ]

ध) नारीणां शिक्षायै रमा स्वकीयं जीवनं अर्पितवती। [ ]

ड) आश्रमे निस्सहायाः बालकाः निवसन्ति स्म। [ ]

२. कोष्ठकात् शुद्धं उत्तरं चित्वा रिक्त स्थानानि पूरयत –

क) 'मुक्तिमिशन' संस्थानं ............ स्थापितम्। (पुणे नगरे/मुम्बई नगरे)

ख) रमाबाई मातुः नाम ............ आसीत्। (सावित्रीबाई / लक्ष्मीबाई)

ग) रमाबाई–महोदयायाः प्रसिद्धं रचना ............ वर्तते। (द्वयं/त्रायं)

ध) सा विपिन बिहारी दासने सह ............. विवाहं अकरोत्। (न्यायालये/देवालये)

ड) आश्रमे निस्सहायाः ................... निवसन्ति स्म। (बालकाः/स्त्रियाः)

३. अधोलिखितानां पदानां निर्देशानुसारं पदपरिचयं लिखत –

| पदानि | मूलशब्दः | लि ु म् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| पिता | .......... | .......... | .......... | .......... |
| शिक्षायै | .......... | .......... | .......... | .......... |
| नारीणाम् | .......... | .......... | .......... | .......... |
| भारते | .......... | .......... | .......... | .......... |

नाम ............................ संस्कृतम्

रोल न. ........................ S.A.-I

# कक्षा – सप्तमी

## कार्यपत्राकम्–८

## षष्ठः पाठः (सदाचारः)

१. श्लोकम् पठित्वा मञ्जूषातः चित्वा उचित शब्दैः रिक्तस्थानानि पूरयत –

श्लोकः – सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रिय।

प्रियं च नानृतं ब्रूयात् एष धर्मः सनातनः।।

(१) .................. ब्रूयात् प्रियं ब्रूयात् (२) ब्रूयात् सत्यमप्रियं।

प्रियं च नानृतं (३) ............ एष (४) ................ सनातनः।।

(मञ्जूषाः – न, ब्रूयात्, धर्मः, सत्यम्)

२. एकपदेन उत्तरत – (कोष्ठकात् चित्वा शुद्धं अर्थम् लिखत)

क) कदा ईश्वरं स्मरेत्? (सायंकाले/प्रातःकाले)

ख) किम् न ब्रूयात्? (सत्यं/असत्यं)

ग) कम् कर्मणा सेवेत्? (गुरुम्/पितरं)

ध) व्यवहारे कदाचन किम् न स्यात्? (कौटिल्यं/औदार्यं)

ड) मित्रोण सह कलहं कृत्वा नरः कीदृशः भवेत्? (दुःखी/सुखी)

३. अधोलिखितवाक्येषु अव्ययपदं चित्वा तत्समक्षं लिखत –

क) भक्तः सदा ईश्वरं स्मरति।

ख) असत्यं न वक्तव्यम्।

ग) प्रियं तथा सत्यम् वदेत्।

ध) लता मेधा च विद्यालयम् गच्छतः।

ड) अपि कुशली भवान्।

४ ब्रूयात्, सेवेत, स्यात् 'इति' क्रियापदैः प्रयुज्य रिक्तस्थानानि पूरयत -

क) मनसा मातरं पितरं च ....................।

ख) सत्यं प्रियम् च ....................।

ग) व्यवहारे कदाचन कौटिल्यं न ....................।

ध) श्रेष्ठजनं कर्मणा ....................।

ड) व्यवहारे सर्वदा औदार्यम् ....................।

च) अनृतं प्रियम् च न ....................।

नाम ............................ संस्कृतम्
रोल न. ........................ S.A.-II

# कक्षा – सप्तमी

# कार्यपत्राकम्–९

# सप्तमः पाठः (संकल्पः सिद्धिदायकः)

१. अधोलिखितम् गद्यांशम् पठित्वा प्रश्नानाम् उत्तराणि लिखत –

नारदवचनप्रभावात् पार्वती शिवं पतिरूपेण इच्छन्ती तपस्यां कुर्त्तम् इच्छति स्म। सा स्वसूंल्पं मात्रो न्यवेदयत्। तच्छ्रुत्वा पार्वत्याः माता चिन्ताकुला अभवत्। पुत्रयाः कोमलतनुं दृष्ट्वा जननी आदिशत् – वत्से! क्व कठिनं तपः क्व च तव कोमलं शरीरम्? कथम् आतपात् शीतात् वा आत्मानं रक्षिष्यसि? तर्हि तपः मा चर। सुखेन स्वगृहे एव वस। अत्रौव व्रतादिकं कुरू।

क) एकपदेन उत्तरत –

१. पार्वती कम् पतिरूपेण इच्छन्ती तपस्यां अकरोत?

२. कस्याः माता चिन्ताकुला आसीत्?

ख) एकवाक्येन उत्तरत –

कस्य वचन प्रभावात् पार्वती शिवं पतिरूपेण इच्छति स्म?

ग) निर्देशानुसारं उत्तरत –

१. गद्यांशे 'रक्षिष्यसि' इति शब्दे कः लकारः अस्ति?

क) लट्  ख) लृट्  ग) लङ्  ध) लोट्

२. 'कोमलतनुं' 'इति' शब्दयोः विशेष्य पदं किम्?

क) कोमल  ख) तनुं  ग) जननी  ध) पुत्री

नाम ............................ संस्कृतम्
रोल न. ........................ S.A.-II

# कक्षा – सप्तमी

# कार्यपत्राकम्–१०

# सप्तमः पाठः (संकल्पः सिद्धिदायकः)

१. मञ्जूषातः पदानि चित्वा समानार्थकानि पदानि लिखत –

(मञ्जूषा – माता, दृष्ट्वा, कानने, जन्तवः, नेत्राणि)

वने .................

पशवः .................

जननी .................

नयनानि .................

विलोक्य .................

२. उदाहरणम् अनुसृत्य रिक्तस्थानानि पूरयत –

| पुरूषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरूषः | अकथयत् | अकथयताम् | अकथयन् |
| प्रथमपुरूषः | अरक्षत् | ............... | ............... |
| मध्यमपुरूषः | अवसः | अवसतम् | अवसत |
| | ............... | अपूजयतम् | ............... |
| उत्तमपुरूषः | अपठम् | अपठाव | अपठाम |
| | ............... | ............... | अरचयाम |

३. धटनाक्रमानुसारं अधोलिखितानि वाक्यानि लिखत –

क) शिवनिन्दां श्रुत्वा पार्वती क्रुद्धा जाता।

ख) वटुः अकथयत् – 'शिवः अशिवं चरति'।

ग) चिरम् तपस्याम् च अकुर्वन्।

ध) वटुरूपेण तपोवनं शिवं प्राविशत्

ड) पार्वती तपस्यार्थम् वने अगच्छत्।

च) सा प्रस्थानाय उद्यता।

छ) वटुः अपृच्छत् –'हे तपस्विनि! किमर्थं कठिनं तपः समाचरसि?'

ज) शिवः वटोः रूपं परित्यज्य पार्वत्याः मार्गम् अवरूध्यत्।

नाम ............................ संस्कृतम्

रोल न. ........................ S.A.-II

# कक्षा – सप्तमी

# कार्यपत्राकम्–११

## अष्टमः पाठः (त्रिवर्णः ध्वजः)

१. कोष्ठकात् उचितशब्दं चित्वा रिक्तस्थानानि पूरयत –

क) अस्माकं राष्ट्रीयध्वजः कीदृशः? (त्रिवर्णः/पञ्चवर्णः) ..................

ख) ध्वजे कति वर्णाः सन्ति? (चतुर्वर्णाः/त्रायःवर्णाः) ..................

ग) त्रिवर्णे ध्वजे शक्त्याः सूचकः कः वर्णः? (केशरः/हरितः) ..................

घ) त्रिवर्णे ध्वजे हरितः वर्णः कस्य सूचकः? (शान्तेः/समृद्धेः) ..................

ड) अशोकचक्रं कस्याः द्योतकं अस्ति? (अहिंसायाः/हिंसायाः) ..................

च) त्रिवर्णः ध्वजः कस्य प्रतीकः? (स्वाभिमानस्य/शौर्यस्य) ..................

२. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कोष्ठके प्रदत्तेन शब्देन कुरुत –

क) अस्माकं <u>त्रिवर्णःध्वजः</u> विश्वविजयी भवेत्। (कः/काः) .............

ख) स्वधर्मात् <u>प्रमादं</u> वयं न कुर्याम। (कम्/किम्) .............

ग) एतत् सर्वम् अस्माकं नेतृणां <u>सद्बुद्धेः</u> सत्फलम्। (के/कस्य) .............

घ) अस्माकं देशस्य ध्वजस्य नाम <u>त्रिवर्णः</u>। (किम्/कम्) .............

ड) त्रिवर्णे ध्वजे <u>श्वेतपट्टिका</u> निर्मलतायाः सूचिका। (कः/का) .............

नाम ............................ संस्कृतम्


रोल न. ........................ S.A.-II

# कक्षा – सप्तमी

## कार्यपत्राकम्–१२

## अष्टमः पाठः (त्रिावर्णः ध्वजः)

१. चित्राम् दृष्ट्वा वाक्यानि रचयत – (मञ्जूषायाः सहायतया)



वाक्यानि – १. ..........................................................................

२. ..........................................................................

३. ..........................................................................

(मञ्जूषा :– एषः, त्रायः, वर्णाः, अस्माकं, अस्ति, ध्वजः, सन्ति, ध्वजे, राष्ट्रीयः)

२. उदाहरणानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयत –

| शब्दाः | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| यथा–अहिंसा | द्वितीया | अहिंसाम् | अहिंसे | अहिंसाः |
| रमा | द्वितीया | ............. | ............. | ............. |
| सफलता | तृतीया | सफलतया | सफलताभ्याम् | सफलताभिः |
| लता | तृतीया | ............. | ............. | ............. |
| सूचिका | चतुर्थी | सूचिकायै | सूचिकाभ्याम् | सूचिकाभ्यः |
| पट्टिका | चतुर्थी | ............. | ............. | ............. |

नाम ............................ | संस्कृतम्
रोल न. ........................ | S.A.-II

# कक्षा – सप्तमी

# कार्यपत्राकम्–१३

# नवमः पाठः (विमानयानं रचयाम)

१. प्रदत्ताभिः कवितापूर्तिभिः रिक्तस्थानानि पूरयत –

क) उन्नतवृक्षं तुं भवनम्,

क्रान्त्वाकाशं खलु याम।

कृत्वा हिमवन्तं सोपानं

चन्दिरलोकं प्रविशाम।।

(अ) ................. तुं भवनम्

क्रान्त्वाकाशं (ब) .................याम।

कृत्वा (स) ................. सोपानं

चन्दिरलोकं (द) .................।।

२. श्लोकांशान् मेलयत –

१. नीले गगने विपुले विमले – मौक्तिकहारं रचयाम।

२. उन्नतवृक्षं तुं भवनं – वायुविहारं करवाम।

३. विविधा सुन्दर ताराश्चित्वा – क्रान्त्वाकाशं खलुयाम।

३. कोष्ठकान्तर्गतैः उचितशब्दैः रिक्तस्थानानि पूरयत –

क) सा ............... जलेन मुखं प्रक्षालयति। (विमलेन/कमलेन)

ख) राधवः ................... विहरति। (विमानयानेन/आकाशेन)

ग) कण्ठः ............ शोभते। (चन्द्रहारेण/मौक्तिकहारेण)

ध) नभः ............ प्रकाशते। (चन्द्रेण/धनेन)

ड) पर्वतशिखरं .............. आकर्षकं दृश्यते। (मौक्तिकमालया/अम्बुदमालया)

४ प्रश्नानाम् उत्तराणि तत्समक्षे प्रदत्तैः शब्दैः दीयताम् –

क) वयं कुत्रा याम? (ग्रहम्/आकाशं)

ख) वयं कीदृशं सोपानं रचयाम? (तुम्/हिमवन्तं)

ग) वयं कस्मिन् लोके प्रविशाम? (चन्दिरलोके/सूर्यलोके)

ध) केषां गृहेषु हर्षम् जनयाम? (पीडितजनानां/सुखीजनानां)

५. विलोमपदानि योजयत -

| | |
|---|---|
| क) उन्नतः | पृथिव्याम् |
| ख) गगने | असुन्दरः |
| ग) सुन्दरः | अवनतः |
| ध) दुःखी | शोकः |
| ड) हर्षः | सुखी |

नाम ............................ संस्कृतम्

रोल न. ........................ S.A.-II

# कक्षा – सप्तमी

# कार्यपत्राकम्–१४

# दशमः पाठः (विश्वबन्धुत्वम्)

१. गद्यांशं पठित्वा प्रश्नान् उत्तरत –

एतेषां सर्वेषां कारणं विश्वबन्धुत्वस्य अभाव एव। इयम् महती आवश्यकता वर्तते यत् एकः देशः अपरेण देशेन सह निर्मलेन हृदयेन बन्धुतायाः व्यवहारं कुर्यात्। यदि इयं भावना विश्वस्य जनेषु बलवती स्यात् तदा विकसिताविकसित देशयोः मध्ये स्वस्था स्पर्धा भविष्यति। येन सर्वे देशाः ज्ञानविज्ञानयोः क्षेत्रो मैत्राीभावनया सहयोगेन च समृद्धिं प्राप्तुं समर्थाः भविष्यन्ति।

१. एकपदेन उत्तरत –

क) इयं महती का वर्तते?

ख) हृदयेन कस्याः व्यवहारं कुर्यात्?

२. पूर्णवाक्येन उत्तरत –

केषु का च बलवती स्यात?

३. निर्देशानुसारम् उत्तरत –

क) 'इयं भावना' अनयोः पदयोः विशेषणपदं किम्?

ख) 'भविष्यन्ति' इति क्रियापदस्य कर्त्ता कः?

२. कोष्ठकात् समुचितं पदं चित्वा रिक्तस्थानानि पूरयत –

क) .................. नमः (शिवं/शिवाय)

ख) ................... परितः वृक्षाः सन्ति। (ग्रामस्य/ग्रामम्)

ग) ................... उपरि खगाः सन्ति। (वृक्षस्य/वृक्षम्)

ध) ................... उभयतः वृक्षाः सन्ति। (नदीम्/नद्याः)

नाम ............................ संस्कृतम्
रोल न. ........................ S.A.-II

# कक्षा - सप्तमी

# कार्यपत्राकम्–१५

# दशमः पाठः (विश्वबन्धुत्वम्)

१. श्लोकं पठित्वा कथनानां समक्षं सत्यं असत्यं वा लिखत -

'अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्।।

क) १. अयं मम अस्ति उदारजनाः चिन्तयन्ति - .............

२. अयं अपरस्य अस्ति इति निम्नजनाः चित्तयन्ति - .............

३. सम्पूर्ण संसारः एव मम बन्धु तुल्य अस्ति इति उत्तमाः जनाः चिन्तयन्ति - .............

ख) उचितं भावं (✓) इति चिह्नेन चिन्हितं कुरुत

क) लघुचेतसाम् -

१. येषां हृदयं लघु भवति।

२. येषां हृदयं विशालं भवति।

ख) उदारचरितानाम् -

१. येषां हृदयं विशालं भवति।

२. येषां हृदयं लघु अस्ति।

२. मञ्जूषातः समानार्थकपदानि चित्वा लिखत -

परस्य, दुःखम्, आत्मानम्, एषः, पृथ्वी, परिवारम्, त्यक्त्वा

स्वकीयम् ............................

कुटुम्बकम् ............................

वसुधा ............................

अन्यस्य ............................

अपहाय ............................

अयं ............................

कष्टम् ............................

३. रेखांकितपदानि आधृत्य कोष्ठकात् शुद्धं अर्थ चिनुत -

क) छात्राा: क्रीडाक्षेत्रो <u>कन्दुकात्</u> क्रीडन्ति। (कन्दुकेन/कन्दुकम्)

ख) <u>ते</u> बालिका: मधुरं गायन्ति। (ता:/ताम्)

ग) अहं <u>पुस्तकालयेन</u> पुस्तकानि आनयामि। (पुस्तकालयात्/पुस्तकालयम्)

ध) <u>त्वं</u> किं नाम? (तव/युवाम्)

ड) गुरूं नम:। (गुरूणा/गुरवे)

नाम ............................ संस्कृतम्

रोल न. ........................ S.A.-II

# कक्षा – सप्तमी

## कार्यपत्राकम्–१६

## एकादशः पाठः (समवायो हि दुर्जयः)

१. शुद्धं उत्तरं चित्वा प्रश्नानाम् उत्तराणि दीयताम् –

क) वृक्षे का प्रतिवसति स्म? (चटका/गजः)

ख) चटकायाः किम् भुवि अपतत्? (फलम्/नीडं)

ग) गजः केन शाखाम् अत्रोटयत्? (पादेन/शुण्डेन)

ध) मक्षिकायाः मित्रां कः आसीत्? (मण्डूकः/खगः)

ड) कालेन कस्याः सन्ततिः जाता? (गजस्य/चटकायाः)

च) वृक्षस्य अधः कः आगतः? (गजः/खगः)

२. मञ्जूषातः क्रियापदानि चित्वा रिक्तस्थानानि पूरयत –

करिष्यामि, गमिष्यति, अनयत्, पतिष्यति, स्फोटयिष्यति, त्रोटयति

क) काष्ठकूटः चञ्च्वा गजस्य नयने ....................।

ख) गजः गर्ते ......................।

ग) मार्गे स्थितः अहमपि शब्दं .......................।

ध) गजः शुण्डेन वृक्षशाखाः .......................।

ड) तृषार्तः गजः जलाशयं .......................।

च) काष्ठकूटः तां मक्षिकायाः समीपं .......................।

३. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत –

क) ....................... बालिका मधुरं गायति। (एकम्/एका/एकः)

ख) ....................... पत्राणि सुन्दराणि सन्ति। (ते/ताः/तानि)

ग) धेनवः दुग्धं ....................। (ददाति/ददति/ददन्ति)

ध) वयं संस्कृतं .......................। (अपठम्/अपठन्/अपठाम)

नाम ............................ संस्कृतम्

रोल न. ........................ S.A.-II

# कक्षा - सप्तमी

# कार्यपत्राकम्–१७

# एकादशः पाठः (समवायो हि दुर्जयः)

१. उदाहरणमनुसृत्य रिक्तस्थानानि पूरयत –

| | पुरूषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| क) | पुरूषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| यथा– | प्रथम पुरूषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| | प्रथम पुरूषः | चलिष्यति | .................. | .................. |
| | प्रथम पुरूषः | .................. | खादिष्यतः | .................. |
| ख) | पुरूषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| | मध्यम पुरूषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| | मध्यम पुरूषः | ..................... | क्रीडिष्यथः | .................. |
| ग) | उत्तम पुरूषः | लेखिष्यामि | लेखिष्यावः | लेखिष्यामः |
| | उत्तम पुरूषः | ..................... | ........................ | हसिष्यामः |

२. उदाहरणानुसारं 'स्म' शब्द योजयित्वा भूतकालिकक्रियां रचयत –

यथा –अपठत् पठति स्म

अपतत् ...........................

अवदत् ...........................

अनयत् ...........................

अवसत् ...........................

३. धटनाक्रमानुसारम् वाक्यानि पुनः लिखत –

क) नीडं भुवि अपतत्।

ख) अण्डानि च विशीर्णानि।

ग) मेधनादनामकः मण्डूकः गर्ते ध्वनिम् अकरोत्।

घ) मक्षिका गजस्य कर्णे शब्दम् अकरोत्।

ङ) चटकायाः नीडम् एकः प्रमतः गजः शुण्डेन अत्रोटयत्।

च) काष्ठकूटः मेधनादमण्डूकस्य सहायतया गजं हन्तुम् उपायम् अकरोत्।

छ) मण्डूकस्य ध्वनिं श्रुत्वा गजः गर्त्ते अपतत् मृतश्च।

ज) पुरा एकस्मिन् वृक्षे एका चटका प्रतिवसति स्म।

झ) चटका व्यलपत्।

ञ) अंधः गजः मार्गं न जानन् गर्त प्रति अगच्छत्।

नाम .............................. संस्कृतम्
रोल न. ......................... S.A.-II

# कक्षा - सप्तमी

# कार्यपत्राकम्-१८

# द्वादशः पाठः (कल्पलतेव विद्या)

१. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत -

क) कः पशुः? (विद्याहीनः/विद्यावान्)

ख) का भोगकारी? (साधना/विद्या)

ग) के पुरूषं न विभूषयन्ति? (केयूराः/मयूराः)

ध) का एका पुरूषं समलूरोति? (वाणी/वीणा)

ड) कानि क्षीयन्ते? (संस्कृतवाणी/भूषणनि)

२. श्लोकाशांन् योजयत -

| क | | ख |
|---|---|---|
| विद्या राजसु पूज्यते न हि धनम् | - | हारा न चन्द्रोज्ज्वलाः |
| केयूरा न विभूषयन्ति पुरूषं | - | न भ्रातृभाज्यं न च भारकारि |
| न चौरहार्य न च राजहार्यम् | - | या संस्कृता धार्यते |
| मातेव रक्षति पितेव हिते नियुङ्क्ते | - | विद्या विहीनः पशुः |
| वाण्येका समलूरोति पुरूषम् | - | कान्तेव चाभिरमयत्यपनीयखेदं |

३. मञ्जूषायाः सहायतया अन्वयेषु रिक्तस्थानानि पूरयत -

मञ्जूषाः - यशः, गुरूणाम्, प्रच्छन्नगुप्तम्, परा, अधिकम्, पशु राजसु, न, सुखकरी, विदेशगमने

अन्वयः - विद्या नाम नरस्य (१) ................... रूपं (२) ................... धनम्

विद्या भोगकरी (३) ...................... (४) ................... विद्या (५) ................... गुरूः।

विद्या (६) ................... बन्धुजनः विद्या (७) ................... देवता

विद्या (८) ................... पूज्यते धनम् (९) ................... हि विद्याविहीनः (१०) ...................।।

४ उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत –

क) विद्या राजसु पूज्यते। ..................

ख) वाग्भूषणं भूषणं न, ..................

ग) विद्याधनं सर्वधनेषु प्रधानम्। ..................

ध) विदेशगमने विद्या बन्धुजनः न भवति। ..................

ड) विद्या सर्वत्रा कीर्ति तनोति। ..................

५. मञ्जूषातः पुल्लिंग, स्त्राीलिु, नपुंसकलिु पदानि चित्वा लिखत –

(विद्या, धनम्, संस्कृता, सततम्, कुसुमम्, नरः, पशुः, गुरूः, कान्ता

| यथा – | पुँल्लिुम् | स्त्राीलिुम् | नपुंसकलिुम् |
|---|---|---|---|
| | हाराः | अलङ्कृता | भूषणम् |
| | ........................ | ........................ | ........................ |
| | ........................ | ........................ | ........................ |
| | ........................ | ........................ | ........................ |

नाम .............................  संस्कृतम्
रोल न. .........................  S.A.-II

# कक्षा – सप्तमी

# कार्यपत्राकम्–१९

# त्रायोदशः पाठः (अमृतं संस्कृतम्)

१. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

गद्यांशः – विश्वस्य सर्वासु भाषासु संस्कृतभाषा प्राचीनतमा भाषा अस्ति। भाषा इयं बह्वीनां भाषाणां जननी मता। अस्यामेव भाषायां ज्ञानविज्ञानयोः निधिः सुरक्षिता अस्ति। यथोक्तं – 'भारतस्य प्रतिष्ठे द्वे संस्कृतं – संस्कृतिस्तथा' अस्याः भाषायाः वैज्ञानिकतां विचार्य एव सुगणकविशेषज्ञाः कथयन्ति यत् संस्कृतमेव सुगणकस्य कृते सर्वोत्तमा भाषा विद्यते।

१. एकपदेन उत्तरत –

क) का प्राचीनतमा अस्ति?

ख) संस्कृतं कस्य कृते सर्वोत्तमा अस्ति?

२. पूर्णवाक्येन उत्तरत –

संस्कृतं संस्कृतिस्तथा के स्तः?

३. निर्देशानुसारम् उत्तरत –

१. 'भाषासु' इत्यस्य पदस्य विशेषणं किम्

क) प्राचीनतमा  ख) सर्वासु  ग) सर्वोत्तमा  ध) निधिः

२. 'माता' इत्यस्य पदस्य पर्यायपदं गद्यांशे किम्?

क) भाषा  ख) जननी  ग) संस्कृति  ध) विज्ञानम्

नाम ............................ संस्कृतम्
रोल न. ........................ S.A.-II

# कक्षा – सप्तमी

# कार्यपत्राकम्–२०

# त्रायोदशः पाठः (अमृतं संस्कृतम्)

१. विशेषणैः सह विशेष्यपदानि योजयत –

| विशेषणाः | विशेष्याः |
|---|---|
| क) चत्वारः | भाषा |
| ख) विश्वकविः | भास्कराचार्यः |
| ग) सर्वोत्तमा | वेदाः |
| घ) अष्टादश | काव्यसौन्दर्यम् |
| ड) सिद्धान्तशिरोमणि | पुराणानि |
| च) अनुपमम् | कालिदासः |

२. इकारान्त स्त्रीलिु शब्दरूपं अधिकृत्य रिक्तस्थानानि पूरयत –

| | | | |
|---|---|---|---|
| गति (प्रथमा) | गतिः | गती | गतयः |
| मति (प्रथम) | ............. | ............. | ............. |
| बुद्धि (द्वितीया) | बुद्धिम् | बुद्धी | बुद्धीः |
| प्रीति (द्वितीया) | ............. | ............. | ............. |
| नीति (तृतीया) | नीत्या | नीतिभ्याम् | नीतिभिः |
| शान्ति (तृतीया) | ............. | ............. | ............. |
| मति (चतुर्थी) | मत्यै | मतिभ्याम् | मतिभ्यः |
| प्रकृति (चतुर्थी) | ............. | ............. | ............. |

३. यथायोग्यं संजोज्य लिखत –

| क | ख |
|---|---|
| दूरदर्शनस्य आदर्शवाक्यम् | नभः स्पृशं दीप्तम्। |
| चाणक्येन | योगक्षेमं वहाम्यहम् |
| जीवनबीमानिगमस्य आदर्शवाक्यम् | भास्कराचार्यः। |
| शून्यस्य आविष्कर्ता | सत्यं शिवं सुन्दरम्। |
| वायुसेनायाः आदर्शवाक्यम् | अर्थशास्त्रां रचितम्। |

५. रेखाङ्कितानि पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत –

क) संस्कृते ज्ञान विज्ञानयोः निधिः सुरक्षितोऽस्ति। (का/कः)

ख) संस्कृतमेव सुंणकस्य कृते सर्वोत्तमा भाषा। (कस्य/केन)

ग) शल्यक्रियायाः वर्णनं संस्कृतसाहित्ये अस्ति। (कस्मिन्/कुत्रा)

ध) वरिष्ठान् प्रति अस्माभिः प्रियं व्यवहर्त्तव्यम्। (कान्/काम्)

नाम ............................ संस्कृतम्
रोल न. ........................ S.A.-II

# कक्षा – सप्तमी

# कार्यपत्राकम्–२१

# चतुर्दशः पाठः (अनारिकायाः जिज्ञासा)

१. कोष्ठकेभ्यः समुचितपदानि चित्वा अधोलिखितानाम् प्रश्ननानाम् उत्तराणि दीयताम् –

क) कस्याः महती जिज्ञासा वर्तते? (अनारिकायाः/रमायाः)

ख) मन्त्राी किमर्थम् आगच्छति? (भ्रमणार्थम्/उद्धाटनार्थम्)

ग) सेतोः निर्माणं के अकुर्वन? (प्रजाः/कर्मकराः)

ध) के सर्वकाराय धनं प्रयच्छति? (मन्त्राी/प्रजाः)

२. रेखाड्ढतिपदानि आधृत्य प्रश्ननिर्माणम् कोष्ठकेषु प्रदत्तैः शब्दैः कुरुत –

क) अनारिकायाः प्रश्नैः सर्वेषां बुद्धिः भ्रमति। (के/का)

ख) मन्त्राी सेतोः उद्धाटनार्थम् आगच्छति। (कयोः/कस्य)

ग) कर्मकराः सेतोः निर्माणम् कुर्वन्ति। (कौ/के)

ध) पर्वतेभ्यः प्रस्तराणि आनीय सेतोः निर्माणं भवति। (काभ्यः/केभ्यः)

ड) जनाः देशस्य विकासार्थं धनं यच्छति। (केन/कस्य)

३. उदाहरणानुसारं रूपाणि लिखत –

| विभक्तिः | एकवचनं | द्विवचनं | बहुवचनं | |
|---|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितारः | (पितृ) |
| | ............. | भ्रातरौ | .............. | (भ्रातृ) |
| द्वितीया | दातारं | दातारौ | दातृन् | (दातृ) |
| | ................. | धातारौ | .............. | (धातृ) |
| तृतीया | धात्रा | ............... | धातृभिः | (धातृ) |
| | ................ | कर्तृभ्याम् | ............. | (कर्तृ) |

| | | | | |
|---|---|---|---|---|
| चतुर्थी | नेत्रो | नेतृभ्याम् | नेतृभ्यः | (नेतृ) |
| | विधात्रो | ................ | .............. | (विधातृ) |
| पञ्चमी | कर्तुः | कर्तृभ्याम् | कर्तृभ्यः | (कर्तृ) |
| | ............. | .............. | हर्तृभ्यः | (हर्तृ) |
| षष्ठी | पितुः | पित्रोः | पितृणाम् | (पितृ) |
| | ............ | भ्रात्रोः | ............ | (भ्रातृ) |
| सप्तमी | सवितरि | सवित्रोः | सवितृषु | (सवितृ) |
| | अभिनेतरि | ............. | ............ | (अभिनेतृ) |
| सम्बोधनम् | हे जामातः! | हे जामातरौ! | हे जामातरः | (जामातृ) |
| | हे नप्तः! | ............... | ............... | (नप्तृ) |

नाम ............................ 					संस्कृतम्

रोल न. ........................ 					S.A.-II

# कक्षा – सप्तमी

# कार्यपत्राकम्–२२

## चतुर्दशः पाठः (अनारिकायाः जिज्ञासा)

१. कोष्ठकेभ्यः समुचित पदानि चित्वा रिक्तस्थानानि पूरयत –

क) अहं प्रातः ................. सह भ्रमणाय गच्छामि। (पित्रा/पितुः)


ख) बाला आपणात् ........... फलानि आनयति। (भ्रातुः/भ्रात्रो)

ग) कर्मकराः सेतोः निर्माणस्य .............. भवन्ति। (कर्तारम्/कर्त्तारः)

घ) मम .............. तु एतेषां प्रश्नानाम् उत्तराणि अददात्। (पिता/पितरः)

ङ) तव ......... कुत्रा जीविकोपार्जनं कुरुतः? (भ्रातरः/भ्रातरौ)

२. चित्रां दृष्ट्वा मञ्जूषातः पदानि च प्रयुज्य पञ्च वाक्यानि रचयत –



(उद्यानस्य, अस्ति, मयूरः, अनेकानि, सन्ति, पुष्पाणि, एकः, उद्याने, एषः, सुन्दराणि, नृत्यति, चित्राम्)

१. ........................................................................................................................

२. ........................................................................................................................

३. ........................................................................................................................

४ ........................................................................................................................

५. ........................................................................................................................

**नाम ..............................** **संस्कृतम्**
**रोल न. .........................** **S.A.-II**

# कक्षा – सप्तमी

# कार्यपत्राकम्–२३

# पञ्चदशः पाठः (लालनगीतम्)

१. पद्यांशं पठित्वा कवितांशं उचितपदैः पूरयत –

उदिते सूर्ये धरणी विहसति।
पक्षी कूजति कमलं विकसति।।
नदिते मन्दिरे उच्चैर्ढक्का।
सरितः सलिले सेलति नौका।।

१. उदिते सूर्ये .............. ..............।
पक्षी कूजति .............. ..............।।
.............. .............. उच्चैर्ढक्का।
.............. .............. सेलति नौका।।

२. मञ्जूषातः समानार्थक पदानि चित्वा लिखत –

खगः, देवालयम्, रविः, जले, मृगः, पृथिवी, गौ, वने।

सूर्यः – ..............
धरणी – ..............
पक्षी – ..............
हरिणः – ..............
सलिले – ..............
धेनुः – ..............
मन्दिरम् – ..............
विपिने – ..............

३. उचितकथनानां समक्षम् 'आम्' अनुचित कथनानां समक्षं 'न' इति लिखत -

क) प्रातः काले सूर्यः न उदेति।

ख) धेनुः दुग्धं यच्छति।

ग) पुष्पेषु चित्रापतुाः डयन्ते।

ध) सायंकाले कमलम् विकसति।

ड) वने व्याध्रः गर्जति।

च) अश्वः मन्दम् धावति।

४ अधोलिखित - तालिकायाम् क्रियापदानि उदाहरणानुसारं चिनुत -

| | | | | | | |
|---|---|---|---|---|---|---|
| कू | ज | ति | य | खा | मि | प |
| श | त् | थः | न | द | ति | आ |
| सि | ड | ग | र्ज | ति | र | च |
| उ | य | च्छ | ति | ठ | द | धा |
| द | न्ते | ति | ह | मः | षः | व |
| ति | ण | ट | नी | से | ल | ति |

१. कूजति ४. ............... ७. ..................

२. ............ ५. ............... ८. ..................

३. ............... ६. ............... ९. ..................

नाम ............................ संस्कृतम्
रोल न. ........................ S.A.-II

# कक्षा - सप्तमी

## कार्यपत्राकम्-२४

## पञ्चदशः पाठः (लालनगीतम्)

१. पद्यांशं पठित्वा प्रश्नान् उत्तरत -

धेनुः प्रातर्यच्छति दुग्धम्
शुद्धं स्वच्छं मधुरं स्निग्धम्।
गहने विपिने व्याघ्रो गर्जति।
उच्चैस्तत्रा च सिंहः नर्दति।।

क) एक पदेन उत्तरत -

१. का दुग्धं यच्छति?

२. वने सिंहः किम् करोति?

ख) पूर्णवाक्येन उत्तरत -

१. धेनुः कीदृशं दुग्धं यच्छति?


२. व्याघ्रः कुत्रा गर्जति?

ग) निर्देशानुसारम् उत्तरत -

१. 'वने' इत्यर्थे अत्रा किं शब्दं प्रयुक्तम्?

२. पद्यांशे चत्वारि समध्वन्यात्मकानि शब्दानि चित्वा लिखत -

३. चित्रां दृष्ट्वा मञ्जूषातः पदानि च प्रयुज्य वाक्यानि रचयत -



मञ्जूषा - खगाः, विकसन्ति, उदेति, आकाशे, चित्रापताः, सूर्यः, डयन्ते, कूजति, सन्ति, मेधाः)

१. ..........................................................................................................................

२. ..........................................................................................................................

३. ..........................................................................................................................

४ ..........................................................................................................................

५ ..........................................................................................................................